[1]तरः, [2]अवतारः, तारः, तितरिषः-तितरीषः-तितीर्षः, तेतिरः ;
तरितुम्-[A]अवतरीतुम्, तारयितुम्, तितरिषितुम्-तितरीषितुम्-तितीर्षितुम्, तेतिरितुम् ;
[3]तीर्णिः, [4]तारा, तारणा, तितरिषा-तितरीषा-तितीर्षा, तेतिरा ;
तरणम्, तारणम्, तितरिषणम्-तितरीषणम्-तितीर्षणम्, तेतिरणम् ;
[5]तीर्त्वा, तारयित्वा, तितरिषित्वा-तितरीषित्वा-तितीर्षित्वा, तेतिरित्वा ;
वितीर्य, वितार्य, वितितरिष्य-वितितरीष्य-वितितीर्ष्य, वितेतीर्य ;
तारम् २, } तारम् २, } तितरिषम् २-तितरीषम् २-तितीर्षम् २, } तेतिरम् २ ; }
तीर्त्वा २, } तारयित्वा २, } तितरिषित्वा २-तितरीषित्वा २-तितीर्षित्वा २, } तेतिरित्वा २ ; }
[6]तरणिः, [7]तरुः, [8]तरीः, [9]तरुणः.

## (779) "तेज पालने" (I-भ्वादिः-231. सक. सेट्. पर.)

तेजकः-जिका, तेजकः-जिका, तितेजिषकः-षिका, तेतेजकः-जिका ;
तेजिता-त्री, तेजयिता-त्री, तितेजिषिता-त्री, तेतेजिता-त्री ;
इत्यादीनि सर्वाणि रूपाणि भौवादिककेलतिवत् (262) बोध्यानि। तेजितम्[B] ।

---

1. 'ऋदोरप्' (3-3-57) इति भावेऽप् प्रत्ययः । घञपवादः ।
2. 'अवे तॄस्त्रोर्घञ्, (3-3-120) इति करणाधिकरणयोर्घञ् ।
3. क्तिनि, इत्वरपरत्वयोः, 'ॠल्वादिभ्यः क्तिन् निष्ठावद् वाच्यः' (वा. 8-2-44) इति क्तिनस्तकारस्य नकारः । णत्वम् ।
4. भिदादिषु (3-3-104) तारा इति पाठात् ज्योतिषि वाच्ये वृद्धिर्भवति । न तु इत्वमिति ज्ञेयम् ।
5. 'श्र्युकः किति' (7-2-11) इतीण्णिषेधे, इत्वरपरत्वदीर्घेषु रूपम् ।
6. 'अशावतॄभ्योऽनिः' [द. उ. 1.1] इत्यनिप्रत्यये गुणः । तरणिः = सूर्यः ।
7. 'भृमृशीतॄ—' [द. उ. 1-92] इत्युप्रत्ययः । छायापुष्पफलार्थिनोऽमुं तरन्तीति तरुः = वृक्षः ।
8. 'अवितॄ—' [द. उ. 1-82] इति ईप्रत्ययः । तरीः = प्लवो वायुश्च ।
9. 'कॄवृतॄदारिभ्य उनन्' [द. उ. 5-52] इत्युननप्रत्ययः । तरुणः = वायुर्युवा च ।
A. 'अवलोक एव नृपतेः स्म दूरतो रभसाद् रथादवतरीतुमिच्छतः ।
अवतीर्णवान् प्रथममात्मना हरिर्विनयं विशेषयति सम्भ्रमेण सः ॥'
शि. व. 13.7.
B. 'अर्कजितोऽसौ हरिखर्जनोत्कधीरजतप्रशुवातमजेन तेजितम् ।' धा. का. 1. 31.

Indologisches Seminar der Universität Bonn